Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : MN-01**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

### शास्त्रम्—अलङ्कारशास्त्रम्

**भागः - २, पत्रिका - ३**

**विषयः - कुवलयानन्दः**

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. एषां प्रश्नानामुत्तराणि लिखत ।** **10 x2=20**

१. बिम्बप्रतिबिम्बभावो नाम कः ?

२. 'तडिद्गौरी' इत्यत्र कस्य लोपः ? कथम् ?

३. लुप्तोपमा कतिधा ? तन्नामानि लिखत ?

४. अनन्वय-उपमेयोपमानयोः प्रधानः व्यत्यासः कः ?

५. प्रसिद्धोपमानस्य उपमेयत्वकल्पने कोऽलङ्कारः ?

६. रूपकेऽभेद-ताद्रूप्ययोः वैलक्षण्यं लिखत ?

७. 'अचतुर्ववदनो ब्रह्मा' इत्याद्युदाहरणं कीदृशस्य रूपकस्योदाहरणम् ?

८. 'प्रसन्नेन दृगब्जेन' इत्यत्र दृगब्जमित्यत्र उपमितसमासः कुतो न ?

९. स्मृति-भ्रान्ति-सन्देहाः कदा अलङ्कारा इति व्यपदिश्यन्ते ?

१०. अपह्नवः कस्य क्रियते ? किमर्थम् ।

**II. लक्षणोदाहरणमलङ्कारचतुष्टयं निरूपयत** **4 x 5=20**

१. पूर्णोपमा २. प्रतीपम् ३. भ्रान्तापह्नुतिः

४. दीपकम् ५. रूपकातिशयोक्तिः ६. व्यतिरेकः ।

**III. त्रयाणामुत्तरं लिखत** **3x10=30**

१. वाक्यार्थवृत्तिनिदर्शना-रूपकयोः वैलक्षण्यं सोदाहरणं विवृणुत ।

२. आवृत्तिदीपक-प्रतिवस्तूपमयोः व्यत्यासं सलक्षणं विशदयत ।

३. सम्बन्धातिशयोक्ति-असम्बन्धातिशयोक्त्योः वैधर्म्यं सोदाहरणं स्पष्टयत ।

–अनुवर्तते

४.'लिम्पतीव तमोऽङ्गानि' इत्यत्र लेपनकर्तृतादात्म्योत्प्रेक्षा कुतो न ? यथाग्रन्थं विशदयत।

५. प्रथमोल्लेख-द्वितीयोल्लेखयोः वैषम्यं उदाहरणद्वारा प्रदर्शयत।

**IV. पद्यत्रयं व्याख्याय तत्रत्यमलङ्कारं सलक्षणं निरूपयत** **3x6=18**

१. दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य।
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः॥

२. उन्नतं पदमवाप्य यो लघुः हेलयैव स पतेदिति ब्रुवन्।
शैलशेखरगतः पृषद्गणः चारुमारुतधुतः पतत्यधः॥

३. सङ्गतानि मृगाक्षीणां तडिद्विलसितान्यपि।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम्॥

४. रवितप्तो गजः पद्मांस्तद्गृह्यान् बाधितुं ध्रुवम्।
सरो विशति न स्नातुं गजस्नानं हि निष्फलम्॥

**V. अत्र चतुर्णां कोऽलङ्कारः ? सलक्षणं विवृणुत** **3x4=12**

१. इन्दुरिन्दुरिव श्रीमान्।

२. साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।

३. प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा।

४. पलाशमुकुलभ्रान्त्या शुकतुण्डे पतत्यलिः।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति॥

५. यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका।

—o—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : MN-02**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

### शास्त्रम्–अलङ्कारशास्त्रम्

**भागः - २, पत्रिका -४**

**विषयः - साहित्यदर्मणः-१**

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरं लिखत** **10 x2=20**

१. विश्वनाथोक्तं काव्यलक्षणं किम् ?

२. 'वक्रोक्तिः काव्यजीवितम्' कस्येदं लक्षणम् ?

३. 'विभाति गगने चन्द्रः' अत्र अभिधानियामकः कः ?

४. केनोक्तं 'काव्यस्यात्मा ध्वनिः' इति ?

५. व्यञ्जनायाः स्वरूपं किम् ?

६. पदस्वरूपं किम् ?

७. 'श्वेतो धावति' इत्यत्र लक्षणा का ?

८. आकाङ्क्षा नाम का ?

९. वामनोक्तं काव्यलक्षणं किम् ?

१०. रसनाख्या वृत्तिः कैः अङ्गक्रियते ?

**II. चतुर्णामेव सङ्क्षेपेण उत्तरं लिखत** **4 x 5=20**

१. 'गौर्वाहीकः' इत्यत्र का नाम लक्षणा ? स्पष्टयत ।

२. साहित्यदर्पणस्य मङ्गलश्लोकं व्याख्यात ।

३. साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते ?

४. लक्षणायाः लक्षणं किम् ? स्पष्टयत ।

५. काव्यप्रयोजनं प्रतिपाद्य प्रमाणानि दर्शयत ।

–अनुवर्तते

**III. सप्रसङ्गं कारिकात्रयं व्याख्यात।** **3x6=18**

१. सा चैवं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे वदुः ॥

२. बोद्धृस्वरूपसङ्ख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रय विषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥

३. मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥

४. शाब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥

**IV. त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **10x3=30**

१. अभिधानियामकानां संयोगविप्रयोगादीनां स्वरूपं विवृणुत।

२. विश्वनाथोक्तं काव्यलक्षणं सोदाहरणं प्रतिपादयत।

३. व्यञ्जना-अर्थापत्तौ स्मृतौ वा नान्तर्भवति ? कुतः ?

४. मम्मटस्य काव्यलक्षणे सगुणौ' अदोषौ' इति दलद्वयं सयुक्तिकं निराकुरुत।

**V. पद्यद्वयं व्याख्याय विशेषं स्फुटयत।** **2x6=12**

१. गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ॥

२. श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धक शय्यायां मम निमङ्क्ष्यसि ॥

३. स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्देकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥

—०—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : MN-03**

# स्नातकपरीक्षा:—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

### शास्त्रम्—अलङ्कारशास्त्रम्

**भागः - २, पत्रिका - ५**

**विषयः - साहित्यदर्मणः-२, काव्यमीमांसा**

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरं लिखत** **10 x2=20**

१.दोषाणां सामान्यलक्षणं किम् ?

२. 'योगेन दलिताशयः' इत्यत्र आशयशब्दस्य अर्थः कः ?

३. 'न्यक्कारो ह्ययमेव मे यदरयः' इत्यत्र दोषः कः ?

४. आहरतविसर्गत्वं नाम किम् ?

५. कविभिः पक्षिणां खे प्रायेण कः शब्दः प्रयुजयते ?

६. 'कुमारस्ते नराधीश श्रियं समधिगच्छतु' इत्यत्र किं व्यज्यते ?

७. कविसमयानुसारेण के पक्षिणः ज्योत्स्नां पिबन्ति ?

८. न्यूनपदत्वं कस्योक्तौ गुणो भवति ?

९. निरर्थकत्वस्य उदाहरणं किम् ?

१०. सर्वेषामपि दोषाणां कस्मिन् प्रसङ्गे दोषत्वं न भवति ?

**II. चतुरो दोषान् सलक्षणोदाहरणं निरूपयत ।** **4 x 5=20**

१. दुःश्रवत्वम् २. भग्नप्रक्रमत्वम् ३. नेयार्थत्वम्

४. प्रसिद्धित्यागः ५. सङ्कीर्णत्वम् ६. रसस्य स्वशब्देनोक्तिः ।

**III. प्रश्नत्रयमुत्तरयत** **3x10=30**

१. 'यत्तदोर्नित्यसम्बन्धः' इति नियमं सविस्तरं सोदाहरणं च विशदयत ।

२. अर्थगतान् दोषान् नाम्ना निर्दिश्य तीन् दोषान्सलक्षणोदाहरणं निरूपयत ।

३. उपमादोषान् सोदाहरणं निरूप्य तेषामन्तर्भावः कुत्रेति विचारयत ।

–अनुवर्तते

४. कवीनां समयः कः ? यथाग्रन्थं विवृणुत ।

५. 'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा' इत्यत्र नञर्थः कः ? कथं च तत्र दोषः विवेचयत ।

**IV. वाक्यद्वये दोषं सलक्षणं निर्णयत ।** **2x5=10**

१.शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।

२. आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ।

३. प्रोज्ज्वलज्ज्वलनज्वालाविकटोरुसटाच्छटः ।
श्वासाक्षिप्तकुलक्ष्माभृत् पातु वो नरकेसरी ॥

४. रमणे चरणाप्रान्ते प्रणतिप्रवणेऽधुरा।
वदामि सखि तत्त्वं ते कदाचिन्नोचिताः क्रुधः ॥

**V. अ) एकमउत्तरं लिखत** **1x10=10**

समाध्यभ्यासयोः काव्यकर्मणि कः परं व्याप्रियते ? मतभेदं प्रदर्श्य सिद्धान्तं निरूपयत ।

२. चतुदर्श विद्यास्थानानि कानि ? निर्दिश्य तेषां स्वरूपं विशधयत ।

**आ) सप्रसङ्गं वाक्यद्वयं व्याख्यात ।** **2x5=10**

१. तथापि संवृणु प्रगल्भस्य पुंसः कर्म ।

२. न ह्यप्रवर्तितप्रदीपाः तमसि तत्त्वार्थसार्थमिध्यक्षयन्ति ।

३. नहि राजहंसश्चन्द्रिकापानाय प्रभवति नापि चकोरोऽद्भ्यः क्षीरोद्धरणाय ।

४. नहि प्रकृतिमधुरा द्राणा फाणितसंस्कारमपेक्षते ।

—०—

Total No. of Questions :6 ] [ Total No. of Printed Pages : 2

**Code No. : MN-04**

# स्नातकपरीक्षा:–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–सामान्यभागः

### भागः - ३, पत्रिका - ६

### विषयः -संस्कृतभाषाशास्त्रं, साहित्यचरितं च।

**दिनाङ्कः** - 27-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

### भागः-१

**I. प्रबन्धात्मकमुत्तरं लिखत (द्वयोरेव)** **2 x10=20**

१.भाषापरिवर्तनस्थाः स्वाभाविककारणं विमृशत।

२. अर्थविकासस्य नियमानधिकृत्य लिखत।

३. संस्कृतभाषायाः प्राकृतभाषाविकासमुद्दिश्य प्रबन्धं लिखत।

**II. टिप्पणीः लिखत (द्वयोरेव)** **2 x 5=10**

१. दैवी उत्पत्तिवादः २. वर्णपरिवर्तनम् ३. भाषायाः लक्षणम्

### भागः-२

**III. दीर्घोत्तरं लिखत (चतुर्णामेव)** **4x10=40**

१. रामायणे उत्तरकाण्डस्य वैशिष्ट्यं लिखत।

२. वेदाध्ययने वेदाङ्गानामुपकरं वर्णयत।

३. कालिदासस्य कालादिविषयं निरूप्य रघुवंशमहाकाव्यस्य वैशिष्ट्यं स्पष्टयत।

४. संस्कृतनाटकेषु भासस्य स्थानं निरूपयत।

५. पुराणानि कानि ? तत्र प्रतिपादितविषयाः के ? विचारयत।

६. वेणीसंहारनाटकस्य कविपरिचयं कृत्वा कथासारांशं लिखत।

**IV. टिप्पणीः लिखत (चतुर्णामेव)** **4x5=20**

१. भवभूतिः २. नैषधीयचरितम् ३.सामवेदः

४. नाटकलक्षणम् ५. शूद्रकः

–अनुवर्तते

**V. संयोज्य लिखत** **5x1=5**

| अ | | आ |
|---|---|---|
| १. कुमारसम्भवम् | – | उपरूपकम् |
| २. नागानन्दः | – | हर्षवर्धनः |
| ३. प्रबोधचन्द्रोदयः | – | श्रीहर्षः |
| ४.त्रोटकम् | – | कालिदासः |
| ५.नैषधीयचरितम् | – | कृष्णमिश्रः |

**VI. रिक्तस्थानानि पूरयत** **5x1=5**

१. बालभारतस्य कर्ता.......................।

२. माघस्य महाकाव्यम्....................।

३.चण्डकौशिकनाटकस्य कर्ता..............।

४. शतपथब्राह्मणः............वेदस्य प्रमुखग्रन्थः ।

५. विशाखदत्तस्य कृतिः..............अस्ति

—०—

Total No. of Questions :3 ] [ Total No. of Printed Pages : 1

**Code No. : MN-05**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - परिभाषेन्दुशेखरः

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I. यथारुचि पञ्चैव प्रश्नाः समाधेयाः** **12 x 5=60**

१.अस्मिन् शब्दशास्त्रे उभयगतित्वं कथं कुत्र भवतीति सोदाहरणं स्पष्टयत।

२. अणिण्ग्रहणेषु संशये जाते किं कर्तव्यम् ? ग्रन्थकृदाशयं विलिखत।

३. 'उदीचां माङ-' इति निर्देशेन का परिभाषा ज्ञापिता ?
आत्वे कर्तव्ये धातुत्वम् अपेक्षितमुत न ? सग्रन्थं विशदयत।

४. कीदृशः कार्यो निमित्ततया नाश्रीयते ? अत्र किं ज्ञापकम् ? सविस्तरं लखित ?

५. 'स्थानेऽन्तरतमः' इत्यत्र तमप्ग्रहणमेव अनेकविधान्तर्यसत्तागमकं कथमिति सोदाहरणं व्याख्यात।

६. 'क्वचिदेकदेशोऽप्यनुवर्तते' अस्याः परिभाषायाः फलं कुत्रेति दर्शयत।

७. 'सुप्तिङन्तं पदम्' इति सूत्रस्थेन अन्तग्रहणेन का परिभाषा ज्ञाप्यते। अस्याः किं फलम् ?

**II. अवतरणिकाद्वयमपि साशयसमाधानं विवृणुत** **10 x 2=20**

१. ननु 'वान्तो यि प्रत्यये' इत्यादौ यादौ प्रत्यय इत्यर्थः कथम् ?

२. ननु 'त्यदादीनामः' इत्यादिना 'इमम्' इत्यादौ अनुनासिकः स्यात्।

**III. चतुर्णामेव टिप्पणीं रचयत** **05 x42=20**

१. अनागमकानां साकमका आदेशाः। २. सर्वे विधयश्छन्दसि विकल्प्यन्ते।

३. भाव्यमनोऽप्युकारः सवर्णान् गृह्णाति। ४. उणादयोऽव्युत्पन्नानि प्रतिपदिकानि।

५. व्यपदेशिवद्भावः।

Total No. of Questions :3 ] [ Total No. of Printed Pages : 1

**Code No. : MN-06**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - प्रौढमनोरमा—१

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्च प्रश्नान् व्याख्यात** **12 x 5=60**

१. 'ध्यायं ध्यायं परं ब्रह्मे'ति मङ्गलश्लोकं विलिख्य व्याख्यात।

२. वर्णसमाम्नाये 'हकारद्वयस्य उपादानस्य किं प्रयोजनम् ? व्याख्यात।

३. पूर्वत्रासिद्धमित्यस्य अधिकरणत्वे फलमुपपाद्य कार्यासिद्धत्वे फलं प्रदर्शयत।

४. 'इको यणचि' सूत्रं सोदाहरणं व्याख्यात।

अथवा

'एत्येधत्यूठ्सु' इति सूत्रं यथाग्रन्थं व्याख्यात।

५. 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रे द्विवचनग्रहणप्रयोजनं ब्रूत।

६. 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति सूत्रस्यार्थमुक्त्वा 'परमदण्डिनौ' इत्यत्र ङमुट् भवति न वेति विचारयत।

**II. ससन्दर्भं व्याख्यात (द्वयोरेव)** **10 x 2=20**

१. अन्त्येनेत्यप्रधानतृतीयानिर्देशात्।

२. उपदेशे किम् ? अब्भ्र आँ अपः।

३. मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम।

**III. टिप्पणीं रचयत (द्वयोरेव)** **10 x 2=20**

१. उपदेशः    २. प्रत्याहारः

३.परिभाषा    ४. सूत्रलक्षणम्

—०—

Total No. of Questions :7 ] [ Total No. of Printed Pages : 1

**Code No. : MN-07**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

### शास्त्रम्—व्याकरणशास्त्रम्

**भागः - २, पत्रिका - ५**

**विषयः - महाभाष्यम्—१**

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I.** 'लिङ्गार्था तु प्रत्ययापत्तिः' यथाभाष्यं विवृणुत । **10**

**II.** 'अथ गौरित्यत्र कः शब्दः' इतीदं वाक्यं सप्रसङ्गं विमृशत । **10**

**III.** 'वृत्तिसमवायार्थो उपदेशः' इतीदं सावतरणं निरूपयत । **10**

**IV.** **एतेषु द्वयं व्याख्यात ।** **5x2= 10**

१. अप्रयुक्तेदीर्घसत्रवत् ।

२. इष्टबुध्यर्थश्च ।

३. गर्गादिविदादिपाठात् संवृतादीनां विवृत्तिः ।

४. अनुबन्धकरणार्थश्च ।

**V.** 'शब्दानुशासनस्य अध्ययनस्य प्रयोजनानि कानि? विशदयत **20**

**VI.** 'चत्वारि शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य' इतीदं ग्रन्थोक्तरीत्या व्याख्यात । **20**

**VII.** **एतेषु सावतरणं चतुर्णां व्याख्यानं कुरुत** **4x5= 20**

१. दुष्टः शब्दः २. यस्तु प्रयुङ्क्ते

३. उत त्वः ४. दशम्यां पुत्रस्य ।

५. सुदेवोऽसि

—०—

Total No. of Questions :2 ] [ Total No. of Printed Pages : 1

**Code No. : MN-08**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—नवीनन्यायशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः - पञ्चलक्षणी, चतुर्दशलक्षणी च

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि त्रयः प्रश्नाः समाधेयाः** **3x20= 60**

१. द्वितीयलक्षणे समासं प्रदर्श्य सदलकृत्यं समन्वित।

२. साकल्यं कुत्र बोध्यम्? कुतः ? केचित्तु किं वदन्ति ? प्राञ्चोऽपि किं वदन्ति ?

३. अभावद्वये प्रतियोगिवैयधिकरण्यं कुतो देयम् ?
प्रतियोगितावच्छेदकानवच्छिन्नेत्यादिना परिष्कारः किंनिमित्तकः ?

४. 'न हि भवति नीलो घटो घटान्यः' इत्येतत्सप्रसङ्गमुपपाद्य पञ्चमलक्षणं सङ्गमयत।

**II. द्वावेव समाधेयौ** **2x20= 40**

१. अथेत्यादिग्रन्थस्य कूटघटितलक्षणाभिप्रायकत्वमुपपादयत।

२. प्रतियोगिताया व्यासज्यवृत्तित्वानुपगमे दोषानाशङ्क्य परिहरत।

३. प्रमेयसाध्यकस्थले भावत्वेनाभावानां अभावत्वेन भावानामभावः सुलभ एव। उपपदायत।

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MN-09**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—नवीननन्यायशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - सामान्यनिरुक्तिः-१

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि त्रयः प्रश्नाः समाधेयाः** **15x3= 45**

१. 'अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्' इति लक्षणं लक्ष्ये सङ्गमयत ।

२. 'उपधेयसङ्करेऽपि उपाध्यायसङ्करः' इत्यस्य अभिप्रायं विवृणुत ।

३. 'अथ विशिष्टविषयकं ज्ञानं प्रतिबन्धकम्' इत्यादिदीधितिग्रन्थं सप्रसङ्गं व्याख्यात ।

४. प्रथमलक्षणं दोषपरत्वेन दुष्टपरत्वेन च व्याख्यात ।

५. साध्याभाववद्वृत्ति साधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः, विचारयत ।

**II. यथेष्टं पञ्चप्रश्नाः दशवाक्यैः समाधेयाः** **5x5= 25**

१. हेतुतदाभासज्ञानयोः तत्वनिर्णयप्रयोजकत्वं कथम् ?

२. कुत्र क्षणैकविलम्बेन अनुमितिरभ्युपगम्यते ?

३. हेतुःसाध्यस्य व्यभिचारी इत्यत्र व्यभिचारपदार्थः कः ?

४. प्रथमलक्षणस्य इतरभेदानुमापकत्वमुपपादयत ।

५. अनुमितिपदस्य अनुमितितत्करणपरत्वं कथम् ?

६. प्रथमलक्षणघटकज्ञानपदं विमृशत ।

७. 'तत्र अनुमितिपदं अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमितितत्करणज्ञानपरं' इति दीधितिग्रन्थं व्याख्यात

**III. लघूत्तराणि लिखत** **2x10= 20**

१. प्रत्यक्षादौ बाधेन ज्ञानं प्रतिबध्यते वा न वा ?

२. प्रथमलक्षणे स्थितस्य अनुमितिपदस्थानुमितिसामान्यपरत्वे को दोषः ?

–अनुवर्तते

३. कस्य दोषनिष्ठानुमितिप्रतिबन्धकतायामवच्छेदकत्वं स्वीक्रियते ?

४. असद्धेतूनां लक्षणं किम् ?

५. 'ततद्धटकं च न विशिष्टमि'त्यत्र किं तत् ?

६. 'चरमयोः दोषलक्षणत्वमेवोचितम्' इत्यत्र किं बीजम् ?

७. साध्यवत्ताज्ञाने प्रमात्वनिश्चयः कः ?

८. हेत्वाभासपदार्थः कः ?

९. स्वविषयकज्ञानकार्यं प्रति स्वस्य प्रयोजकत्वं कथम् ?

१०. विजयप्रयोजकत्वं नाम किम् ?

**IV.** **एकेन वाक्येन उत्तरं लिखत** **1x10= 10**

१. 'तत्वनिर्णयः' इत्यस्य गादाधरी व्याख्या का ?

२. 'धूमो वह्नेर्व्यभिचारी' ति भ्रमे भ्रमत्वं कुत्र ?

३. ज्ञायमानदोषस्य प्रतिबन्धकत्वे प्रथमलक्षणार्थः कः ?

४. हेत्वाभासपदस्य विग्रहः कथम् ?

५. प्रथमलक्षणघटकं ज्ञानं यदवगाहि ग्राह्यम् ?

६. साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे कुत्र अव्याप्तिः ?

७. तृतीयं हेत्वाभासलक्षणं लिखत ।

८. अभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्यत्र केन सम्बन्धेन प्रमेयत्वस्य भ्रमः वाच्यः ?

९. हेतुदोषाः के ?

१०. हेत्वाभासाः के ?

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MN-10**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—नवीनन्यायशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः - सिद्धान्तलक्षणम्

**दिनाङ्कः** - 25-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि त्रयः प्रश्नाः समाधेयाः** **15x3= 45**

१. मण्युक्तसिद्धान्तलक्षणं क्वचिल्लक्ष्ये सङ्गमयत ।

२. 'द्रव्यं गुणकर्मान्यत्वे सति सत्त्वात्' इत्यत्र अव्याप्तिं परिहरत ।

३. सिद्धान्तव्याप्तिस्वरूपे किमर्थं असमानाधिकरणान्तं देयम् ?

४. अभावत्वं स्वरूपसम्बन्धविशेष इति साधयत ।

**II. त्रीण्येव सप्रकरणं विवृणुत ।** **5x3= 15**

१. आद्या भिन्ना द्वितीयात्वभिन्नैवेति ध्येयम् ।

२. येन रूपेण साध्यतावच्छेकत्वं तेनैव रूपेण ।

३. यत्तदर्थयोरननुगमात् ।

४. उभयत्र प्रतियोगिव्यधिकरणत्वं बोध्यम् ।

**III. अ)टिप्पणीः आरचयत (चतुर्णामेव)** **5x4= 20**

१. उभयत्वम् २. उपाधिः ३. अव्याप्यवृत्तित्वम्

४. असद्धेतुः ५. अभावाऽभावस्वरूपम्

**आ) सङ्क्षेपेण उत्तरत** **2x5= 10**

१. पूर्वपक्षव्याप्तिपरित्यागे किं बीजम् ?

२. 'अयं कपिसंयोगी' इत्यत्र अयमिति निर्देशः कुतः ?

३. 'परितः प्रतियोग्युपलब्धेः' इत्यत्र परितः इत्यस्य कोऽर्थः ?

–अनुवर्तते

४. प्रतियोगिवैयधिकरण्यं नाम किम् ?

५. अनुमितेः पूर्वं साध्यसिद्धौ को दोषः ?

**IV. रिक्तस्थलं पूरयत** **1x10= 10**

१. न च यो यदीययावद्विशेषाभाववान् सः...........इति व्याप्तेः ।

२. एतेन अयं संयोगसामान्याभाववान्..............इति निरस्तम् ।

३. प्रतियोग्यसामानाधिकरण्यं च.........असामानाधिकरण्यम् ।

४. तच्छून्ये च काले..............प्रतियोगिव्यधिकरत्वात् ।

५. स्वाभावाभावात्मकस्य........द्रव्यत्वस्य द्रव्यत्वानतिरेकात् ।

६. इत्थमेव च तादात्म्यात्..........व्याप्तिनिश्चय इति सङ्गच्छते ।

७. साध्यशून्यानामपि हेतुमतां................साध्यवत्त्वात् ।

८. अत एव जलादीनां ..................तत्र तत्रोक्तं सङ्गच्छते ।

९. यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं.....तादृशप्रतियोगितानवच्छेदकत्वस्योक्तत्वात् ।

१०. दण्ड्यादौ साध्ये.......दण्डत्वादिकमेवावच्छेदकमतो नाव्याप्तिः ।

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MN-14**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—धर्मशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः - वीरमित्रोदयः (परिभाषाप्रकाशः)—१

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I.** **विवृणुत।** **10**

१. अर्धोऽष्टाङ्गः २. सर्वौषध्यः ३. सप्तधातवः

४. पञ्चामृतम् ५. पञ्चगव्यम्

**II.** **विवृणुत।** **10**

१. महारत्नानि २. रत्नपञ्चकम् ३. आमिक्षा

४. पृषदाज्यम् ५. चतुःसमम्

**III.** मनूक्तानि धर्ममूलानि विवृणुत **10**

**IV.** विद्यानां धर्मस्य च चतुर्दशस्थानानि विवृणुत। **10**

**V.** कृतादियुगेषु विशेषधर्मान् विवृणुत। **10**

**VI.** द्रव्यदेशकालादीनां कथं धर्मत्वम्? विवृणुत। **10**

**VII.** आपस्तम्बोक्तं धर्मफलं विवृणुत। **10**

**VIII.** प्राजापत्यादितीर्थानां स्वरूपं प्रकाशयत। **10**

**IX.** त्रैदशकादितीर्थानां विनियोगं प्रकाशयत। **10**

**X.** आगमानां प्रामाण्यं साधयत। **10**

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MN-15**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—धर्मशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः - याज्ञ्यवल्क्यस्मृतिः—१ (आचाराध्यायः मिताक्षरासहितः)

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना—यथारुचि पञ्चैव प्रश्नाः समाधेयाः। सर्वे समानाङ्काः।**

**I.** उपोद्घातप्रकरणं विवृणुत। 20

**II.** ब्रह्मचारिप्रकरणोक्तमुख्यविषयान् निरूपयत। 20

**III.** विवाहधर्मप्रकरणोक्तमुख्यविषयान् निरूपयत। 20

**IV.** गृहस्थधर्मप्रकरणं व्याख्यात। 20

**V.** भक्ष्याभक्ष्यप्रकरणोक्तविचारान् प्रकटयत। 20

**VI.** दानप्रकरणोक्तविषयान् सङ्गृह्य वर्णयत। 20

—०—

Total No. of Questions : 11 ] [ Total No. of Printed Pages : 1

**Code No. : MN-16**

# स्नातकपरीक्षा:–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–धर्मशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः - जैमिनीयन्यायमालाविस्तरः

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना–यथारुचि दशैव प्रश्नाः समाधेयाः । सर्वे समानाङ्काः ।**

**I.** शाखाभेदात् कर्मभेदोऽस्ति वा ? अधिकरणमारचयत ।

**II.** 'नैवारश्चरुर्भवति', 'चरुमुपदधाति' इति श्रूयते । तत्र किं यागो विधीयते उत उपधानमात्रम्?विवेचयत ।

**III.** आधानस्य विधेयत्वाधिकरणं लिखत ।

**IV.** सञ्ज्ञाकृतं कर्मभेदं साधिकरणं प्रकाशयत ।

**V.** निगदानां यजुष्ट्वाधिकरणमुपपादयत ।

**VI.** अपूर्वस्याख्यातप्रतिपाद्यत्वं साधयत ।

**VII.** वाक्यशेषेण सन्दिग्धार्थनिरूपणाधिकरणं लिखत ।

**VIII.** 'यजमानः प्रस्तरः' इत्यत्राधिकरणमारचयत ।

**IX.** कल्पसूत्राणां किं स्वतः प्रामाण्यं वर्तते ? अधिकरणं सम्पादयत ।

**X.** हेतुवन्निगदाधिकरणं स्पष्टयत ।

**XI.** धर्मे विधिप्रामाण्याधिकरणमारचयत ।

—०—

Total No. of Questions : 2 ] [ Total No. of Printed Pages : 2

**Code No. : MN-17**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–ज्योतिश्शास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः - लीलावती

**दिनाङ्कः** - 22-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्चप्रश्नाः समाधेयाः** **8x5= 40**

१. यस्य वृत्तस्य व्यासमानम् ७ तस्य क्षेत्रस्य क्षेत्रफलम् गोलघनफलं च ससूत्रम् आनयत ।

२. वर्गानयनक्रमं विलिख्य १३५ सङ्ख्यायाः वर्गम् आनयत ।

३. घनमूलानयनक्रमं विलिख्य २४६०३७५ सङ्ख्यायाः घनमूलम् आनयत ।

४. समच्छेदीकरणविधानपूर्वकं ३+ $\frac{१}{८}$+ $\frac{१}{३}$योगम् आनयत ।

५ ससूत्रं गणनफलम् आनयत ३ $\frac{१}{३}$x४ $\frac{१}{४}$x ५ $\frac{१}{१०}$ x१ $\frac{१}{२०}$

६. शून्ययोगवियोगादिविचारान् विलिख्य कः खगुणः निजार्धयुक्तः त्रिभिश्च गुणितःस्वहृत त्रिषष्टिः ?

**II. सप्तमप्रश्नमपहाय आहत्य षट् प्रश्नाः समाधेयाः ।** **10x6= 60**

१. विलोमविधिं निरूप्य यः त्रिघ्नः, स्वचरणैः त्रिभिरन्वितः, सप्तभिः भक्तः, स्वत्र्यंशेन विवर्जितः, वर्गीकृतः, द्विपञ्चाशता हीनः, वर्गमूलीकृतः, अष्टयुतः, दशभिः हृतः, तदा द्वयं जातम् । तर्हि सः कः राशिः? इति साधयत ।

२. यातं हंसकुलस्य मूलदशकं मेघागमे मानसं
प्रोड्डीय स्थलपद्मिनीवनमगादष्टांशकोऽम्भस्तटात् ।
बाले बालमृणालशालिनि जले केलिक्रियालालसं
दृष्टं हंसयुगत्रयं च सकलां यूथस्य सङ्ख्यां वद ।। ससूत्रं विवृणुत ।

३.पञ्चराशिकादौ फलानयने करणसूत्रं विलिख्य गणितं कुरुत ।

अ) मासे शतस्य यदि प ञ्चकलान्तरं स्यात् वर्षे गते भवति किं वद षोडशानाम् ?

आ) विस्तारे त्रिकराः कराष्टकमिता दैर्घ्ये विचित्राश्च चेद् रूपैरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् । दैर्घ्ये सार्धकरत्रयाऽपरपटी हस्तार्धविस्तारिणी तादृक् किं लभते ?

–अनुवर्तते

४. भुजकोट्योर्योगे कर्णे च ज्ञाते पृथक्करणसूत्रं विलिख्य दशसप्ताधिकाः कर्णः, त्र्यधिकविंशतिः भुजकोटियुतिः यत्र तत्र पृथक् भुजकोटी आनयत।

५. त्रिभुजस्य क्षेत्रफलानयनक्रमं विलिख्य भूः-१४-, भुजौ-१३,१५ चेत् क्षेत्रफलमानयत।

६. यस्य क्षेत्रस्य वदनम्-११, आधारः-२२, भुजौ १६,२०तस्य चतुर्भुजक्षेत्रस्य क्षेत्रफलं ससूत्रमानयत।

७. **अ) रिक्तस्थानं पूरयत।**

१. द्रम्मैस्तथा.....च निष्कः।

२. तुलाज्ञाः कर्षं सुवर्णस्य...........सञ्ज्ञं प्रवदन्ति।

३. वर्गमूलघनः स्वघ्नः वर्गराशेः.....भवेत्।

४. लवा लवघ्नाश्च हरा हरघ्नाः......सवर्णनं स्याात्।

५. अहारराशेः............हरः कल्प्यः।

**आ) योजयत।**

| | | |
|---|---|---|
| १. अन्त्यधनं मुखयुग्दलितम् | – | व्यस्तत्रैराशिकम्। |
| २. व्यकेपदघ्नचयः मुखयुक् | – | सामान्यत्रैराशिकम्। |
| ३. इच्छावृद्धौ फले ह्रासः | – | अन्त्यधनम्। |
| ४. इच्छावृद्धौ फले वृद्धिः | – | गद्याणकः भवति। |
| ५.धरणद्वयम् | – | मध्यधनम्। |

—०—

Total No. of Questions : 11 ] [ Total No. of Printed Pages : 1

**Code No. : MN-18**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—ज्योतिश्शास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -सूर्यसिद्धान्तः—१

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना—अन्तिममनपहाय यथारुचि अष्टप्रश्नाः समाधेयाः।**

**I.** कालविभागं विलिख्य सौरचान्द्रदेवब्राह्ममानानां स्वरूपं विशदयत। 12

**II.** अहर्गणानयनक्रमं मासवर्षाधिपानयनक्रमं च विलिखत। 12

**III.** रेखादेशस्वदेशयोः पूर्वापरान्तरज्ञानं कथं सिद्ध्यति? विशदयत। 12

**IV.** मध्यग्रहात् स्पष्टग्रहस्य भिन्नत्वे कारणं विलिख्य दक्षिणोत्तरकर्षणस्य स्वरूपं विमृशत। 12

**V.** चापात् ज्यासाधनम्, ज्यातः चापानयनं सोदाहरणं विलिखत। 12

**VI.** मन्दशीघ्रफलयोः संस्कारक्रमं निरूप्य चन्द्रगतौ विशेषं प्रतिपादयत। 12

**VII.** ग्रहाणां वक्रगतौ कारणं विलिख्य वक्रारम्भे वक्रत्यागे च केन्द्रांशान् प्रदर्शयत। 12

**VIII.** ग्रहाणां स्फुटक्रान्तिसाधनोपयोगिशरानयनप्रकारं विवृणुत। 12

**IX.** द्युज्याचरज्ययोः आनयनक्रमं विलिख्य दिनरात्रिमानानयनं दर्शयत। 12

**X.** स्फुटदिग्ज्ञानप्रकारं सालेख्यं विशदयत। 12

**XI.** अधो निर्दिष्टेषु चतुर्णां टिप्पणीः आरचयत। **4x4= 16**

१. सूर्यमयासुरसंवादः। २. ग्रहाणां प्राग्गतित्वम्। ३. मध्यमग्रहानयनम्।

४. देशान्तरसंस्कारः। ५. वारप्रवृत्तिः ६. कुजादीनां गतिवैविध्यम्।

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MN-19**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—ज्योतिश्शास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -बृहज्जातकम्—१

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्चरिक्तस्थानानि पूरयत ।** **5x1=5**

१. स्वल्पं वृत्तविचित्रमर्थबहुलं.......प्रारभे ।

२. मकरराशेः अधिपः........।

३. दिनकरयुताद्भात् द्वितीयं च...........।

४. शत्रू.....समश्च शशिजो मित्राणि शेषा रवेः ।

५. अन्तः सारान्........जनयति ।

६. निशि पितृमातृसञ्ज्ञितौ....।

**II. एकेन वाक्येन उत्तरं लिखत (पञ्चानाम्)** **5x1=5**

१. शनेः उच्चस्थानं उच्चांशं च लिखत ।

२. होरा किं अभिव्यनक्ति ।

३. कालपुरुषस्य हृदयं को राशिः ?

४. निशाख्याः राशयः के ?

५. गुरोः मूलत्रिकोणराशिः कः ?

६. राजकुमारः ग्रहः कः ?

**III. दशानां सङ्क्षेपेण उत्तरं लिखत ।** **10x3=30**

१. मेषादिराशीनां वर्णान् लिखत ।

२. सूर्यादिनाथाः देवताः के ?

—अनुवर्तते

३. रव्यादिग्रहाणां दृष्टिस्थानानिलिखत ।

४. वियोनिजन्मज्ञानं कथमिति स्पष्टयत ।

५. भारेषु केन्द्र-चतुरस्र उपचयस्थानानि कानि ?

६. कदा निश्चयात् परेण जातं प्रवदन्ति ?

७. आरोहिणी-अवरोहिणी-अधमा च दशा कथं निर्णीयते ?

८. दशारम्भकालिकचन्द्रस्थितिवशात् फलानि निरूपयत ।

९. भदन्तभाषिते विद्यमानः विशेषः कः ?

१०. परमायुषः प्रमाणं कदा सम्भवति ?

११. होरादीनां कल्यस्वादिसञ्ज्ञान्तराणि लिखत ।

१२. कुजबुधयोः स्वरूपं लिखत ।

**IV. योगद्वयस्य ग्रहस्थितिं निरूपयत ।** **5x2=10**

१. वामनकयोगः २. मातृपरित्यागयोगः

३. पोतगतप्रसवयोगः ४. पितृबन्धनयोगः

**V. पञ्चानां विस्तरेण उत्तरं लिखत ।** **10x5=50**

१. ग्रहाणां षड्वर्गाः कथं निरूप्यन्ते? तेषामधिपतीनां निर्णयं च कुरुत ।

२. ग्रहाणां षड्बलानि ग्रन्थोक्तदिशा विशदयत ।

३. गर्भस्य पुंस्त्रीविभागज्ञानं कथं भवतीति स्पष्टयत ।

४. कन्दुकक्षेत्र....इत्याद्युक्तशरीरविभागं प्रदर्श्य जातस्य व्रणादिज्ञानं स्पष्टयत ।

५. बलपिण्डायुर्दायोक्तानि हरणानि विशदयत ।

६. चन्द्रकुजयोः शुभाशुभानि दशाफलानि विलिखत ।

७. कस्यापि पुंसः अर्थाप्तिपूर्वकं आजीविकाकथनक्रमं विशदयत ।

८. शशिन्यरिविनाशगे......विलग्नाधिपे ।। श्लोकमेनं पूरयित्वा व्याख्यात ।

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MN-20**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—पूर्वमीमांसाशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -भाट्टदीपिका—१

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना—सर्वे प्रश्नाः समानाङ्काः।**

**1.** मन्त्राणां प्रामाण्यं निरूपयत।

**2.** हेतुमन्निगदाधिकरणं आरचयत।

**3.** मन्वादिस्मृतीनां प्रामाण्यं कथम् ? विलिखत।

**4.** होलाकाद्याचाराणां प्रामाण्यं उपपादयत।

**5.** सामर्थ्याधिकरणं विलिखत।

**6.** कल्पसूत्राणां प्रामाण्यं कथम् ? विशदयत।

**7.** अभ्यासात् कर्मभेदं निरूपयत।

**8.** गुणात् कर्मभेदः कथम्? प्रतिपादयत।

**9.** अनुपादेयपञ्चकं विलिखत।

**10.** ऋक्सामवेदयोः स्वरूपं विलिखत।

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MN-21**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—पूर्वमीमांसाशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -भाट्टदीपिका—२

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना—सर्वे प्रश्नाः समानाङ्काः**

**1.** अङ्गत्वं सोदाहरणं विलिखत।

**2.** ‘दशापवित्रेण ग्रहं सम्मार्ष्टि’ इत्यत्र एकत्वं विवक्षितं वा न वा? विलिखत।

**3.** ‘ऐन्द्र्या गार्हपत्यमुपतिष्ठते’ इत्यत्र श्रुतेः प्राबल्यं विलिखत।

**4.** उपक्रमोपसंहाराधिकरणं विलिखत।

**5.** प्रजापतिव्रतानां पुरुषार्थत्वं साधयत।

**6.** ‘पुरोडाशकपालेन तुषानुपवपति’ इत्यत्र कपालस्य तुषोपवापप्रयुक्तत्वं अस्ति नवेति विमृश्य लिखत।

**7.** विदेवनादीनां राजसूयाङ्गत्वं उत अभिषेचनीयाङ्गत्वं वा ? विलिखत।

**8.** ‘यस्य पर्णमयी जुहूर्भवति’ इत्यत्र अर्थवादत्वं समर्थयत।

**9.** पशुना यजेत’ इत्यत्र पश्वेकत्वस्य विवक्षा अस्ति वा ? न वा ? विमृशत।

**10.** अनारभ्य अधीतानां पर्णतादीनां प्रकृतावेव निवेशनं व्याख्यात।

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MN-22**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–पूर्वमीमांसाशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -शास्त्रदीपिका–१

**दिनाङ्कः** -25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना– सर्वे प्रश्नाः समानाङ्काः।**

1. 'लभ्यमाने फले दृष्टे....' इति कुत्र श्रुतं ससन्दर्भं व्याख्यात।

2. अध्ययनाधिकारनियमः ग्रन्थे कथं प्रदर्शितः ? स्पष्टयत।

3. 'प्रथमव्युत्पत्तिः कार्यविषय एव' इति मतमनूद्य खण्डयत।

4. धर्मलक्षणसूत्रे अर्थपदसार्थक्यं ब्रूत।

5. हिंसायां साङ्ख्यमतमनूद्य खण्डयत।

6. बौद्धमतेन प्रत्यक्षमुपपाद्य स्वमतं साधयत।

7. ग्रन्थोक्तप्रमाणलक्षणं निरूपयत।

8. अनुमानस्य प्रमाणान्तरत्वं साधयत।

9. मिश्रोक्तदिशा शक्तेः अतिरिक्तपदार्थत्वं व्याकुरुत।

10. ग्रन्थोक्तदिशा अर्थापत्तिप्रमाणं व्याकुरुत।

—०—

Total No. of Questions : 3 ]                                                                [ Total No. of Printed Pages : 2

**Code No. : MN-23**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—द्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -तत्वसङ्ख्यानं पदार्थसङ्ग्रहश्च

**दिनाङ्कः** - 22-03-2014 ]                                                                [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.]                                                                [ Max. Marks : 100

---

**I. सप्तप्रश्नाः समाधेयाः** **7x10= 70**

१. मङ्गलस्य साफल्यं प्रतिपाद्य, तत्वसङ्ख्याने मङ्गलं समर्थयत।

२. भावेषु स्वतन्त्रतत्वस्य प्रवेशार्थं कथं विभागः कार्यः ? कुतः न कृतः ?

३. अभावं विभज्य लक्षणं विलिख्य सङ्गमयत। इष्यते इति पदस्य कृत्यं निरूपयत।

४. अनित्यं विभज्य, तेषां लक्षणमुक्त्वा, अवान्तरविभागं निराकुरुत।

५. परमात्मस्वरूपं पदार्थसङ्ग्रहरीत्या प्रतिपदायत।

६. जीवप्रकरणं विवृणुत।

७. शक्तिप्रकरणं प्रतिपादयत।

८. गुणत्रयं निरूपयत।

**II. एकेन वाक्येनोत्तरं देयम्।** **$1\frac{1}{2}$x10= 15**

१. पञ्चपर्वाणि कानि ?

२. कर्म कतिविधम् ? कथम्?

३. ब्रह्माण्डं कति विस्तीर्णम् ?

४.किं नाम गुरुत्वम् ?

५.संस्कारः कतिविधः ? के?

६. किमर्थं 'तत्वसङ्ख्यानम्' इति प्रकरणं आरभते भगवानाचार्यः ?

७. 'स्वतन्त्रमस्वतन्त्रं च' इत्यत्र इतिशब्दाध्याहाराभावे को दोषः ?

८. स्वतन्त्रं अस्वतन्त्रं च इत्यत्र स्वतन्त्रशब्दस्यादौ उद्देशे किं कारणम् ?

–अनुवर्तते

९. अभावलक्षणं किम्?

१०.चेतनस्य पूर्वमुद्देशे बीजं किम् ?

**III. पूरयत** **$1\frac{1}{2}$x10= 15**

१. ..............स्पृष्टदुःखः समस्तशः ।

२. ..............इति मुक्तास्तु पञ्चधा ।

३. ..............त्रिधैवाचेतनं मतम् ।

४. विष्णुनास्य समस्तस्य ........... ।

५. ..............नत्वा गुरोरपि ।

६. ...........भेदव्यवहारनिर्वाकाः...........।

७. परमात्मभिन्ना............लक्ष्मीः ।

८. .............हरिणा वायुना च धृतम् ।

९. मुख्यवृत्तिः त्रिविधा...........इति ।

१०. उपासना च द्विविधा..........चेति ।

—०—

Total No. of Questions : 3 ]　　　　[ Total No. of Printed Pages : 2

**Code No. : MN-24**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–द्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -प्रमाणपद्धतिः

**दिनाङ्कः** - 24-03-2014 ]　　　　**[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ]　　　　[ Max. Marks : 100

---

**I.　दशानामेकवाक्येनोत्तरं लिखत**　　　　**$1\frac{1}{2}$x10= 15**

१. अव्यापकलक्षणं किम् ?

२. यथार्थज्ञानं प्रमेत्यत्र यथार्थपदं किमर्थम् ?

३. अयथार्थज्ञानविषये प्राभाकराणामाशयः कः ?

४. केवलप्रमाणं कतिविधम् ? किं किम् ?

५. न्यायमते प्रत्यक्षं कतिविधम् ? किं किम् ?

६. अनुमानलक्षणं किम् ?

७. अन्वयव्यतिरेकिलक्षणं किम् ?

८. दृष्टान्तः कतिविधः ? के के ?

९. वाक्यलक्षणं किम् ?

१०. समयः नाम कः ?

११. वैय्याकरणमतेऽन्वयबोधकः कः ?

१२. आगमः कतिविधः ? के के ।

**II.　रिक्तस्थानं पूरयत ।**　　　　**$1\frac{1}{2}$x10= 15**

१.........लक्ष्यावधारणं लक्षणज्ञानस्य प्रयोजनम् ?

२. प्रमातृप्रमेययोः.....तत्साधनत्वाभावाच्च ।

३. ........स्वप्रश्नायथार्थज्ञानान्तरमस्तीति वैशेषिकाः ?

–अनुवर्तते

४. तत्र मुक्तितमोयोग्यानां स्वरूपज्ञानं..........।

५. तत्र........प्रत्यक्षम् ।

६. .......स्मरणसाधनं मनः ।

७. ........नित्यसंसारिणस्तमोयोग्या इति अयोगिनस्त्रिविधाः ।

८. तथा ज्ञातानामेव पदार्थानामन्वयविशेषस्य......बोधकः ।

९. आगमः.....एवान्तर्भवतीति वैशेषिकादयः ।

१०. सादृश्यज्ञानसाधकं.......।

**III. अन्तिममनपहाय सप्त प्रश्नाः समाधेयाः** **7x10= 70**

१. प्रमाणपद्धतिग्रन्थस्यानारम्भणीयत्वमाशङ्क्यारम्भणीयत्वं समर्थयत ।

२. अनुप्रमाणलक्षणं सदलकृत्यं व्याख्यात ।

३. स्मृतेरयाथार्थ्यमाशङ्क्य याथार्थ्यं साधयत ।

४. 'चतुष्टयी खलु धर्माणां गतिः' इत्यत्रोक्तसाहचर्यनिरूपकधर्मभेदान् निरूपयत ।

५. परार्थानुमानेऽवयवविषये मतभेदं प्रदर्श्य सिद्धान्तं सोदाहरणं प्रतिपादयत ।

६. पदबोध्यपदार्थविषये मतभेदं प्रतिपाद्य सिद्धान्तं लिखत ।

७. का नामार्थापत्तिः ? तस्य कुत्रान्तर्भावः ?

८. 'व्याप्तिप्रकारमपेक्ष्य लिङ्गज्ञानस्य लिङ्गिज्ञानजनकत्वनियमात्' सोदाहरणं निरूपयत ।

—o—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MN-25**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—द्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -उपनिषद्भाष्यम्-१

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि द्वावेव समाधेयौ** **15 x2= 30**

१. केनोक्तां यक्षस्याख्ययिकामुपवर्ण्य, देवतातारतम्यमनेन कथं ज्ञातमिति चिन्तयत ।

२. नचिकेतःपृष्टं वरत्रयं किमिति वर्णयित्वा, तृतीयवरविषये किमाह यमः? स्पष्टयत ।

३. ईशोपनिषदः प्रथममन्त्रद्वयस्य परकीयं व्याख्यानं 'अपरे व्याचक्षते' इति टीकारीत्या विमृशत ।

**II. यथारुचि त्रयाणामर्थं लिखत** **10 x3= 30**

१. अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥

२. इह चेदवेदीथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः ।
भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥

३. न वित्तेन तर्पणीयो मनुष्यः लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वाम् ।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥

४. नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयः नचिकेतः प्रष्टा ॥

**III. सप्रसङ्गं त्रीणि व्याख्यात** **5 x3= 15**

१. तस्मिन्नपो मातरिश्वा दधाति ।

२. दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् ।

३. अन्धेनैव नीयमाना यथान्धाः ।

४. प्रेयो मन्दो योगक्षेमान् वृणीते ।

–अनुवर्तते

**IV.** **दशानां पदानामर्थं सप्रमाणं लिखत** **2 x10= 20**

| | | |
|---|---|---|
| १. असुर्याः | २. अस्नाविरम् | ३. पूषा |
| ४. अमृतः | ५.तद्वनम् | ६.अनेकरूपाम् |
| ७. अक्षितिः | ८. शुक्रम् | ९. स्वयम्भूः |
| १०. ब्रह्मजज्ञः | ११. अरण्योः | १२. सूर्यः |

**V.** **अङ्कानुगुणं लिखत** **5**

१. केनोपनिषत् कयोः संवादरूपा ? १

२. नाचिकेतमुपाख्यानं कदा पठनीयम्? १

३. हृदयस्य नाड्यः कति वर्तन्ते ? १

४. 'वेदा इत्युच्यन्ते सद्भिः' के ते २

—०—

Total No. of Questions : 11 ] [ Total No. of Printed Pages : 1

**Code No. : MN-26**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -उपनिषद्भाष्यम्–१

**दिनाङ्कः** - 22-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**सूचना–अन्तिममनपहाय यथारुचि दश प्रश्नाः समाधेयाः। सर्वे समानाङ्काः।**

**I.** 'ईशावास्यं' इत्यादिमन्त्राः कर्मसु अविनियुक्ताः कुतः ? विवृणुत।

**II.** 'कुर्वन्नेवेह कर्माणि' मन्त्रं विलिख्य व्याख्यात।

**III.** 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इत्यत्र ज्ञानकर्मसमुच्चयवादं प्रतिपाद्य भाष्योक्तदिशा निराकुरुत।

**IV.** 'केनेषितम्' इति मन्त्रं विलिख्य व्याख्यात।

**V.** 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इत्यत्र दृष्टविरोधं परिहृत्य 'प्रतिबोधविदितं मतम्' मन्त्रमिमं व्याख्यात।

**VI.** गुरुणा उपनिषदुक्ता। तथापि 'उपनिषदं भो ब्रूहि' इति शिष्यवचनस्य कोऽभिप्रायः? विशदयत।

**VII.** 'न नरेणावरेण' इमं मन्त्रं विलिख्य भाष्यानुरोधेन व्याख्यात।

**VIII.** कठोक्तदिशा संसारवृक्षं वर्णयत।

**IX** नचिकेतसा प्रार्थितान् वरान् समन्त्रं प्रतिपादयत।

**X** अतिथ्युपेक्षणे के दोषाः ? विद्योपलब्धये आचार्योपदेशस्य प्राधान्यं विवृणुत।

**XI. टिप्पणीः आरचयत (द्वयोरेव)**

१. उपनिषत् २. नचिकेताः ३. उपासना

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MN-27**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -भगवद्गीताभाष्यम्—१

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं लिखत** **1x5= 5**

१. अधर्मः कदा धर्मं अभिभावयति ?

२.गीतायाः तृतीयाध्यायस्य नाम किम् ?

३. धनञ्जयस्य शङ्खस्य नाम किम् ?

४. युद्धस्य परिणामः कः ?

५. गीताभाष्यस्य मङ्गलश्लोकः कः ?

**II. यथारुचि पञ्चश्लोकानामर्थान् लिखत** **4x5= 20**

१. वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरो पराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

२. देवान् भावयतानेन ते देवाः भावयन्तु नः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

३. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

४. उद्धरेदात्मनात्मानमात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥

५. ये हि संस्पर्शजाः भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥

–अनुवर्तते

६. श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

## III. श्लोकान् पूरयत (यथेच्छं पञ्च) 15

१. जातस्य............................अर्हति ।

२. यज्ञार्थान्.......................समाचर ।

३. तत्त्ववित्तु.......................सज्जते ।

४. किं कर्म........................अशुभात् ।

५. एवं बहुविधाः.................विमोक्ष्यसे ।

६. कायेन.......................आत्मशुद्धये ।

७. आरुरुक्षोः...................कारणमुच्यते ।

८. समं.......................अनवलोकायन् ।

## IV. सविस्तरमुत्तरं लिखत (यथेच्छं चत्वारि) 4x15= 60

१. 'नासतो विद्यते भावः'इत्यस्य वाक्यार्थं वर्णयत ।

२. गीतायाः उपोद्धातस्य सारं वर्णयत ।

३. 'वेदाविनाशिनं नित्यं य एनमजमव्ययम्' इत्यस्य वाक्यार्थं वर्णयत ।

४. 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' इत्यस्य वाक्यार्थं वर्णयत ।

५. 'कर्मण्यकर्म यः पश्येत्' इत्यस्य श्लोकस्य भावं लिखत ।

६. षष्ठाध्यायस्य निरूपणानुसारं कःयोगार्थमर्हः भवति ? कथं योगः कर्तव्यः ?

—०—

Total No. of Questions : 6 ]  [ Total No. of Printed Pages : 2

**Code No. : MN-28**

# स्नातकपरीक्षा:—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—अद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -वेदान्तसारः माण्डूकोपनिषद्भाष्यं च

**दिनाङ्कः** - 25-03-2014 ]  [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.]  [ Max. Marks : 100

---

**प्रथमो भागः**

**I. रिक्तस्थानं पूरयत** **1x8= 8**

१. काम्यानि...............................

२. वेदान्तो नाम.............शारीरकसूत्रादीनि च ।

३. शमादयस्तु.................

४. असर्पभूतायां..................अध्यारोपः ।

५. अनयोः........................अभेदः ।

६. कर्मेन्द्रियाणि.......................।

७. समानो नाम..............समीकरनकरः ।

८.सम्बन्धत्रयं नाम..........लक्ष्यलक्षणभावश्चेति ।

**II. मध्यमविस्तरेण उत्तरयत (यथेच्छं चत्वारि)** **4x3= 12**

१. अधिकारिलक्षणं वेदान्तसारोक्तदिशा लिखत ।

२. जीवन्मुक्तलक्षणं लिखत ।

३. अज्ञानस्य शक्तिद्वयं तत्कार्याणि च निरूपयत ।

४. आत्मसाक्षात्कारसाधनानि निरूपयत ।

५. यमाद्यष्टाङ्गानि निरूपयत ।

**III. आविस्तरं उत्तरयत (यथेच्छं त्रीणि)** **3x10= 30**

१. सृष्टिक्रमं निरूपयत ।

२. तत्वमसि इति महावाक्यस्य तात्पर्यं सप्रमाणं निरूपयत ।

–अनुवर्तते

३. पञ्चकोशान् निरूपयत ।

४. प्रकरणग्रन्थस्य महत्त्वं लिखत ।

## द्वितीयो भागः

**IV. एकेन वाक्येन उत्तरयत** **1x8= 8**

१. माण्डूक्योपनिषत् कस्मिन् वेदे अन्तर्भवति ?

२. माण्डूक्यकारिकायाः कर्ता कः ?

३. आत्मनः कति पादाः ?

४. आत्मनः नेदिष्ठप्रतीकं किम् ?

५. माण्डूक्यकारिकाया कति प्रकरणानि सन्ति ? कानि कानि ?

६. माण्डूक्यस्थमहावाक्यं किम् ?

७. मकार-तैजसोः साम्यं किम् ?

८. जागरितस्य कति मुखानि ?

**V. श्लोकान् पूरयत (यथेच्छं पञ्च)** **2x5= 10**

१. बहिष्प्रज्ञो विभुः..........त्रिधा स्थितः ।

२. जागरितस्थानो.........एवं वेद ।

३. द्वैतस्याग्रहणं................न विद्यते ।

४. यत्र सुप्तो.................तृतीयः पादः ।

५.विश्वो हि.................भोगं निबोधत ।

६. निवृत्ते सर्वदुःखानां .............स्मृतः ।

**VI. सविस्तरमुत्तरं लिखत ।(यथेच्छं चत्वारि)** **4x8= 32**

१. माण्डूक्योपनिषद्भाष्यस्य मङ्गलश्लोकं लिखित्वा व्याख्यात ।

२. 'पादा मात्रा मात्राश्च पादाः' इत्येतत् व्याख्यात।

३. 'नान्तःप्रज्ञं....' इतीमं मन्त्रं भाष्यानुसारं व्याख्यात ।

४. आत्मनः प्रथमं पादम् उपनिषदनुसारंकारिकानुसारं च व्याख्यात।

५. माण्डूक्योपनिषदमधिकृत्य लिखत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : MN-29**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -यतीन्द्रमतदीपिका

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I. वाक्येनैकेन समाधत्त** **1x10= 10**

१. कः करिशैलनाथः ?

२. के स्वप्ने दृष्टाः ?

३. वेदान्तार्यः कः ?

४. कति प्रमाणानि ?

५. द्रव्यं कतिविधम् ?

६. कः उपायः ?

७. अन्यथाज्ञानं नाम किम् ?

८. कालः कतिविधः ?

९. शब्दो नाम कः ?

१. कः आप्तः ?

**II रिक्तस्थानानि पूरयत ।** **1x10= 10**

१.लक्षणस्य.....दूषणानि सन्ति ।

२. निर्विकल्पकं नाम...........।

३. द्रव्यग्रहणे......सम्बन्धः ।

४. दिव्यं नाम................।

–अनुवर्तते

५. स्मृतिर्नाम................ज्ञानम् ।

६. सदृशाददृष्टचिन्तायाः....... ..........ज्ञानम् ।

७. .........भ्रष्टैश्वर्यकामः ।

८. अर्थार्थी तु...............।

९.ईश्वरः.................निमित्तकारणं भवति ।

१०. विभुत्वं नाम............।

**III.** **समाधत्त** **12x5= 60**

१. प्रत्यक्षस्य स्वरूपं तद्गतभेदांश्च उपपादयत ।

२. स्मृतेः अतिरिक्तप्रमाणत्वं अस्ति वा नवेति विमृशत ।

३. तन्मात्राणां स्वरूपभेदान् प्रपञ्चयत ।

४. भक्तेः स्वरूपं तदुत्पत्तिप्रकारं च विशोधयत ।

५. नारायणस्य जगत्कारणत्वं साधयत ।

**IV.** **टिप्पणीः रचयत ।** **10x2= 20**

१. शब्दः

२.ईश्वरः पञ्चप्रकारः ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MN-30**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -गीताभाष्यम्-१

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन समाधत्त** **1x10= 10**

१. कः अश्रुपूर्णाकुलेक्षणः ?

२. परिणामस्वभावः कः ?

३. कः न मुह्यति ?

४. कस्य असद्भावः नास्ति ?

५. विनष्टस्य किं अवर्जनीयम् ?

६. विनाशो नाम कः ?

७. किं नाम पापम् ?

८. काम्यकर्मविषया बुद्धिः कीदृशी ?

९. कुतः प्रवृत्ताः वेदाः ?

१०. योगो नाम ?

**II रिक्तस्थानानि पूरयत ।** **1x10= 10**

१. तस्य सञ्जनयन् हर्षं............।

२. आचार्याः पितरः पुत्रा..........।

३. अशोच्यानन्वशोचस्त्वं...........।

४. देही नित्यमवध्योऽयं........।

–अनुवर्तते

५. श्रुतिविप्रतिपन्ना ते यदा........।

६. यस्त्वात्मरतिरेव स्यात्.........।

७. काम एषः क्रोध एषः...........।

८. कर्मणो ह्यपि बोद्धव्यं...........।

९. अनाश्रितः कर्मफलं कार्यं कर्म........।

१०. सङ्कल्पप्रभवान् कामान्..............।

**III.** **श्लोकं पूरयित्वा यथाभाष्यं सावतरणं व्याख्यात।** **10x5= 50**

१. कर्मण्येवाधिकारस्ते ....................।

२. एषा ब्राह्मी स्थितिः पार्थ ...............।

३. व्यामिश्रेणैव वाक्येन ..................।

४. मयि सर्वाणि कर्माणि .................।

५. चञ्चलं हि मनः कृष्ण .................।

**IV.** **यथाग्रन्थम् समाधत्त** **15x2= 30**

१. आत्मनां परस्परवैलण्यं स्वरूपञ्च प्रपञ्चयत।

२. कर्मयोगस्यैव कर्तव्यतां तृतीये उक्तदिशा उपपादयत।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MN-31**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—विशिष्टाद्वैतवेदान्तशास्त्रम्

**भागः - २ पत्रिका - ५**

**विषयः -वेदार्थसङ्ग्रहः—१**

**दिनाङ्कः** - 25-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

I **एकेन वाक्येन समाधत्त** **10x1= 10**

१. दिव्यः देवः कः ?

२. सत्यता कस्य प्रतिज्ञाता ?

३. आदेशो नाम कः ?

४. प्रपञ्चः कीदृशः ?

५. शोधकवाक्यानि कं शोधयन्ति ?

६. भिन्नप्रवृत्तिनिमित्तानां केषां कुत्र वृत्तिः ?

७. ब्रह्मणः रूपं कतिविधम् ?

८. तृतीया शक्तिः का ?

९. वादे केषां अनधिकारः ?

१०. अहङ्कारः कतिविधः ?

II **रिक्तस्थानानि पूरयत।** **10x1= 10**

१. श्रूयते नित्यं इति....................।

२.श्रुतिशिरसि........................।

३. अयमात्मा..........................।

४. स ते आत्मा........................।

–अनुवर्तते

५. ब्रह्मविदाप्नोति............................।

६. नान्यः पन्था.............................।

७. जीवात्मस्वरूपं............................।

८. निखिलवेदान्तवेद्यः..........................।

९. तस्य च वैभवप्रतिपादनपराः ...................।

१०. तदनुप्रभृतिभिश्शब्दैः...........च प्रतिपादयन्ति ।

**III. समाधत्त** **10x5= 50**

१. तत्त्वमसीत्यस्याः श्रुतेः अर्थं उपवर्ण्य सामानाधिकरण्यस्वरूपं स्पष्टयत ।

२. प्रत्यक्षस्य निर्विशेषत्वे प्रमाणाभावं साधयत ।

३. तिरोधानानुपपत्तिः नाम का ? कथं प्रदर्शिता, विशदयत ।

४. कार्यार्थे एव शब्दानां व्युत्पत्तिः इतीममाशयं उपवर्ण्य निराकुरुत ।

५. नारायणस्यैव परमकारणत्वं समर्थयत ।

**IV. टिप्पणीः आरचयत** **15x2= 30**

१. भास्करयादवाचार्यमतयोः वैलण्यम् ।

२. उपाय उपेय स्वरूपम् ।

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MN-32**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -उपनिषद्भाष्यम्—१

**दिनाङ्कः** - 22-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I.** ‘ईशावास्यमित्यदिमन्त्राः ज्ञानकर्मसमुच्चयपराः’ इति अभिप्रायं व्याख्यानरीत्या उपपदायत ।

**—अथवा—**

‘असूर्या नाम ते लोकाः’ इति मन्त्रं भाष्यरीत्या व्याख्यात **15**

**II.** मुण्डकोपनिषदुक्तसृष्टिक्रमं विशदयत ।

**—अथवा—**

‘प्लवा ह्येते अदृढा’ इति मन्त्रभागं ससन्दर्भं व्याख्यात । **15**

**III.** लिङ्गाङ्गयोः सामरस्यस्वरूपं उपपदायत । **15**

**IV.** ‘ॐनिधनपतये नमः’ इति शिवोपासनमन्त्रान् नारायणोपनिषद् व्याख्यानरीत्या उपपादयत ।

**—अथवा—**

‘ आपो वा इदग् सर्वम्’ इति जलदेवताप्रार्थनामन्त्रं व्याख्यात **15**

**V.** ‘मानो महान्तमुत मानो’ इति मन्त्रं सिद्धान्तरीत्या व्याख्यात । **15**

**VI.** **टिप्पणीः विलिखत ।** **5x5= 25**

१. पतिकर्मानुष्ठानफलम् ।

२. शौनकप्रश्नः ।

३. मोक्षस्वरूपम् ।

४.चत्वारिशृङ्गा त्रयोऽस्य पादाः ।

५. दहरोपासनम्

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MN-33**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -लिङ्गधारणचन्द्रिका

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** दहराकाशे शिवस्य आराधनाविहितं सिद्धान्तरीत्या व्याख्यात। **15**

**II.** बाह्यलिङ्गधारणं उपनिषत्प्रमाणानुसारेण व्याख्यात । **15**

**III.** 'वामहस्तस्यात्यन्तापकृष्टत्वेन तत्र तत्करणायुक्तमिति' ग्रन्थोक्तदिशा उपपदायत। **15**

**IV.** महाभारतप्रमाणद्वारा खननस्य सिद्धिं प्रतिपादयत । **15**

**V.** 'जीवन्मुक्तस्य स्वरूपं' ग्रन्थोक्तरीत्या प्रतिपादयत। **15**

**VI.** 'कर्म एवं ज्ञानस्य मुक्तिहेतुता' ग्रन्थोक्तदिशा उपपादयत। **15**

**VII.** एतेषु पञ्चानामेव टिप्पणीः विलिखत। **5x5= 25**

१. पञ्चाचारः। २. शिवदीक्षा।

३. नैमित्तिककर्म। ४. अलङ्कारशास्त्ररीत्या लिङ्गधारणम्।

५. नन्दिकेश्वरशिवाचार्यः। ६. शिवकुमारस्य पण्डितः।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : MN-34**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -सिद्धान्तशिखामणिः—१

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना—अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

**I.** ग्रन्थोक्तदिशा शिवस्तुतिं सम्यक् निरूपयत। **15**

**II.** पिण्डस्थलोक्तजीवात्म-परमात्मस्वरूपनिरूपणं कुरुत। **15**

**III.** गुरुकारुण्यस्थलोक्त रीत्या गुरुस्वरूपं निरूपयत। **15**

**IV.** 'लिङ्गधारणं निगमागमपुराणप्रसिद्धमिति प्रमाणानुसारेण प्रतिपादयत। **15**

**V.** पञ्चाक्षरमन्त्रमाहात्म्यं ग्रन्थोक्तरीत्या निरूपयत। **15**

**VI.** नवविधभक्तिस्वरूपं सिद्धान्तरीत्या प्रतिपादयत। **15**

**VII.** 'तामसनिरसनस्थलं शक्तिसम्पादनस्थलं च ग्रन्थोक्तरीत्या विवृणुत। **15**

**VIII.** एतेषु पञ्चानामेव टिप्पणीः विलिखत। **5x5= 25**

१. अगस्त्याश्रमवर्णनम्। २. सहजदानस्थलम्।

३. त्रिपुण्ड्रधारणम्। ४. अङ्ग-लिङ्गस्थलम्।

५. प्राणलिङ्गस्वरूपम्। ६. भोक्तृस्वरूपम्।

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MN-35**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—जैनसिद्धान्तशास्त्रम्

### भागः - २ पत्रिका - ३

### विषयः -प्रमेयरत्नमाला—१

**दिनाङ्कः** - 22-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I.** माणिक्यनन्दि कः ?तस्य देशकालादिकं लिखत। **15**

**II.** प्रमेयरत्नमालानुसारेण प्रत्यक्षपरोक्षभेदप्रमाणं विवृणुत। **15**

**III.** प्रामाण्यं स्वतः परतो वा ? विशदयत। **15**

**IV.** प्रमेयरत्नमालामङ्गलपद्यं विलिख्य विचारयत। **20**

**V.** साङ्व्यव्यवहारिकप्रत्यक्षलक्षणं विलिख्य विवेचयत। **15**

**VI.** इमानि सूत्राणि व्याख्यात। **5x4= 20**

१. स देवदत्तो यथा।

२. अन्यथा तद्घटनात्।

३. तदनुमानं द्वेधा।

४. प्रदीपवत्।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : MN-36**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—जैनसिद्धान्तशास्त्रम्

### भागः - २ पत्रिका - ४

### विषयः -बृहद्द्रव्यसङ्ग्रहः—१

**दिनाङ्कः** - 24-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ब्रह्मदेवपण्डितस्य कालदेशादिकं विचारयत। **10**

II. लोकालोकविभागं लिखित्वा द्रव्यास्रवभेदान् लिखत। **15**

III. सम्यग्दर्शनस्य लक्षणसूत्रं विलिख्य व्याख्यात। **15**

IV. बृहद्द्रव्यसङ्ग्रहोक्तदिशा जीवस्वरूपं निरूपयत। **10**

V. अष्टविकल्पं नाम किम् ? तस्य ज्ञानोपयोगित्वं कथम् ?साधयत। **10**

VI. 'मोक्षमार्गाधिकारम् ग्रन्थोक्तदिशा विवृणुत। **15**

**VII. कारिकेयं सावतरणं व्याख्येया** **15**

स्थानयुतानां अधर्मः पुद्गलजीवानां स्थलसहकारी।
छाया यथा पथिकानां गच्छतां नैव सह धरति॥

**VIII. एतेषां स्वरूपं विशदयत** **10**

१. सम्यग्दर्शनम्।

२.उपभोगो लक्षणम्।

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : MN-37**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—जैनसिद्धान्तशास्त्रम्

### भागः - २ पत्रिका - ५

### विषयः -गोम्मटसारः—१

**दिनाङ्कः** - 25-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I.** जैनसिद्धान्तरीत्या गोम्मटसारमहत्त्वं प्रतिपादयत । **15**

**II.** अवग्रहादिचतुर्भिर्ज्ञानैःद्वादशविधविषयग्रहणप्रकारं विवृणुत । **20**

**III.** ग्रन्थोक्तदिशा पुद्गलद्रव्यभेदं निरूपयत । **15**

**IV.** भगवत्कुन्दकुन्दाचार्याणां कृतिकालदेशमधिकृत्य प्रबन्धमारचयत । **20**

**V.** **इमां गाथां व्याकुरुत ।** **15**

१. पल्लासंश्वेज्जावयविन्दङ्गुल गुणदसेदिमेत्ताहु वे ।
गुव्विय पञ्चदश्वा भोगभुमा पुहविगुव्वंति ।।

**VI. लघुटिप्पणीः रचयत (त्रयाणामेव)** **5x5= 15**

१. पुण्यपापपदार्थः

२. संवरः

३.भावमोक्षः

४.पञ्चास्तिकायः ।

—०—

Total No. of Questions :11 ] [ Total No. of Printed Pages : 4

**Code No. : MS-01**

# स्नातकपरीक्षा:–२०१४

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–सामान्यपत्रिका

### भागः - १, पत्रिका - १

### विषयः -प्रथमभाषा-संस्कृतम्

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टानां प्रश्नानां योग्यमुत्तरं चयनीयम्** **1 x10=10**

१.भाषाप्रवाहः अनेन तुलितः ।

अ) जलप्रवाहेण आ) वायुप्रवाहेण इ). विद्युत्प्रवाहेण ई). शब्दप्रवाहेण

२.इदानीं भारतदेशे इयन्तः संस्कृतविश्वविद्यालयाः सन्ति ।

अ) ५ आ) २५ इ). १५ ई). १८

३. गीताशिक्षणकेन्द्रेण इदं साध्यते ।

अ) गीताप्रचारः आ) अक्षरज्ञानम् इ).गीतान्दोलनम् ई). संस्कृतप्रचारः

४. गीतापठ्यक्रमस्य अध्ययनाय छात्राणां इयन्तो मासा अपेक्षिताः ।

अ) २२ आ) ६ इ). १८ ई). १०

५. राष्ट्रपतिसम्मानपुरुस्कृतस्य यावज्जीवं प्रतिवर्षं इयन्ति रूप्यकाणि दीयन्ते ?

अ) २०.००० आ) ३०.००० इ). २५.००० ई). ५०.०००

६.रङ्गनाथः रेवतीरजन्योः इदं उपायनत्वेन अदात् ।

अ) धनम् आ) वस्त्रम् इ). लेखनीम् ई). पुस्तकम्

७. शिवाजी अनेन वेषेण रायगढं प्रति आगतवान् ।

अ) भिक्षुकः आ) यात्रिकः इ). वर्तकः ई). सन्यासी

८. पिपासितः पथिकः इन्द्रं इदं अयाचत ।

अ) जलम् आ) धनम् इ). वाहनम् ई). मोक्षम्

९. महाराजः रघुः अनेन निर्धनो जातः ।

अ) सोमयागेन आ) विश्वजिद्यागेन इ). अश्वमेधयागेन ई). वाजपेययागेन

१०. पथिकस्य लक्ष्यं इदं आसीत् ।

अ) आत्महितम् आ) लोकहितम् इ). पुत्रहितम् ई). पत्नीहितम्

–अनुवर्तते

**II. द्वयोः श्लोकयोः अभिप्रायं विवृणुत ।** **4 x 2=08**

१. विद्या नरे भाति कुलं न तावत् विद्या जनं रक्षति नैव जातिः ।
रोगेण विप्रोऽपि निपीडितः सन् विस्मृत्य जातिं भिषजं समेति ॥

२. ऋणं योऽत्र मित्राय दत्ते स मूर्खो धनं तस्य नष्टं मैत्री च नष्टा ।
ऋणं यो न दत्ते न गृह्णाति चैव प्रसन्नाः समस्ता जनास्तस्य नूनम् ॥

३. अकारणं कश्चन पूज्यतामियाद् गुणा भवन्त्यत्र न हेतवस्सदा ।
प्रदक्षिणीकृत्य नमन्ति पिप्पलं न कोऽपि चूतं फलिनं नमस्यति ॥

**III. वाक्यद्वयेन वाक्यत्रयेण वा उत्तरत ।** **2x10=20**

१. संस्कृतपाठ्यस्तरे अभिवृद्धिः कुतः आवश्यकी ?

२. भाषाशुद्धिः पूर्वं मनस्थितिः कथमासीत् ?

३. संस्कृतप्रचारविषये माध्यमानां उपयोगः कथं करणीयः ?

४. भाषायाः विकासाय आवश्यकाः अंशाः के ?

५. शृगालः सिंहं कथं वञ्चितवान् ?

६. चित्रग्रीववाक्येन कपोताः किं कृतवन्तः ?

७. जाबालं प्रति ब्रह्मज्ञानं के उपदिष्टवन्तः ?

८. कर्मकरस्य शरीरे व्रणः कथं जातः ?

९. उलूका कुतो गुहासु लीना भवन्ति ?

१०. 'देवा अपि दोषं कुर्वन्ति' इत्यत्र उदाहरणानि प्रदर्शयत ।

**IV. गद्यभागं पठित्वा प्रश्नानुत्तरत** **1x7=07**

केषाञ्चित् शकटानां चालनाय कुञ्चिकायाः भ्रामणं पर्याप्तं भवति । केषाञ्चित् तु पादेन प्रहारः आवश्यकः भवति । भवतः जीवनशकटः अन्यस्य पादेन प्रहतः न भवेत् । अपि तु स्वयंचालितः स्यात् । जनाः परिस्थितिः साधनानि वा कथंसन्तीति, कथं न सन्तीति वा कारणेन भवतः कार्यकरणम् अकरणं वा न । भवता कथं भवितव्यं इति तदनुगुणतः भवतः कार्यं भवेत् । बाह्यकारणैः भवता प्रभाविना न भवितव्यम् । बाह्यनियन्त्रितः जनः प्रतिपदं विफलः भवेत् । अन्तःसत्त्वनियन्त्रितः तु पदे पदे जेष्यति ।

१. केषाञ्चित् शकटानां चालनाय केन प्रहारः आवश्यकः ?

२. भवतः जीवनशकटः कस्य पादेनप्रहतः न भवेत् ?

३. भवतः कार्यं यदनुगुणतः भवेत् ?

४. भवतः कार्यकरणं, अकरणं वा किं अवलम्ब्य न भवेत् ?

५. केषाञ्चित् शकटानां चालनाय कस्याः भ्रामणं पर्याप्तं भवति ?

६. कः पदे पदे जेष्यति ?

७. कः प्रतिपदं विफलः भवेत् ?

**V. एकवाक्येन उत्तरत** **1x7=07**

१. जाबालस्य ब्रह्मज्ञानं कैरुपदिष्टम् ?

२. मधुरदेवता कानि वस्तूनि पथिकाय दातुं उद्यक्तवती ?

३. कपोतान् जालात् कः अमोचयत् ?

४. श्रृगालः वृकं कथं वञ्चितवान् ?

५. मार्गभ्रष्टः पथिकः अटन् कां प्रविष्टवान् ?

६. बालानां हृदयं कीदृशं भवति ?

७. सत्यकामः कस्याः पुत्रः ?

**VI. पुरुषत्रये वचनत्रये च रूपाणि लिखत** **2x2=4**

१. प्राप्नोति २. लभन्ते

**VII. विग्रहवाक्यानि प्रदर्शयत** **2x2=4**

१.त्रिपुरारिभार्ये २. अमृतपानतुल्यः

## भागः-२

**VIII. युक्तेन योजयत** **1x5=5**

| अ | | आ |
|---|---|---|
| १. ठक्कुरः | – | वासुदेवकथा |
| २. विशाखः | – | ग्रामणीः |
| ३. सूतवर्यः | – | श्रीकण्ठः |
| ४.वेदमित्रः | – | लक्षणपुरम् |
| ५.कालिन्दी | – | श्रोत्रियः |

**IX एकवाक्येन उत्तरत** **1x5=5**

१.स्वर्गः कुत्र वर्तते इति विशाखेन श्रुतम् ?

२.मातृसूलं केन दृष्टम् ?

३. अयोध्यानगर्याः अपरं नाम किम् ?

–अनुवर्तते

४. ईश्वरकृष्णः कस्मिन् शास्त्रे महापण्डितः आसीत्।

५. विपाकस्य भगिनी का ?

**X वाक्यद्वयेन वाक्यत्रयेण वा उत्तरत** **2x10=20**

१. विशाखस्य परिचयः सूतवर्यस्य कथमासीत् ?

२. विशाखस्य त्रयाणां मित्राणां नाम किम् ?

३. विशाखस्य आशाद्वयमासीत् ? किं तत् ?

४. नूतने वासुदेवमन्दिरे किं समजनि ?

५. सूतवर्यः विशाखसमीपे किं प्रार्थयामास?

६. डिण्डिमपण्डितः कः ? सः कुत्र वसति स्म?

७. सूतवर्यः भद्रपुरीग्रामे किं कुर्वन् आसीत् ?

८. भस्मासुरः कथं केन नाशितः ?

९. शुभमतिना विशाखं प्रति कौण्डिन्यविषये किमुक्तम् ?

१०. सूतवर्यस्य पुराणपुस्तके कीदृशः आदरः आसीत् ?

**XI पञ्चषैर्वाक्यैः उत्तरत(द्वावेव)** **5x2=10**

१.सौम्यदेवनिधनानन्तरं गृहं प्रत्यागतस्य विशाखस्य कः अनुभवः जातः ?

२. पितृऋणमिव मातृऋणमपि भवति किम् ? विचारयत।

३. जनाः सूतवर्यं कुतः सर्वज्ञं अमन्यन्त ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MN[V]-40**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्— वेदः सामान्यविभागः

### विषयः - वैदिकसाहित्यम्-१

**दिनाङ्कः** - -03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः-** . ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टेषु पञ्चानाम् उत्तरं लिखत** **5 x10= 50**

१. स्थानविभागेन देवतानां निर्णयः कथं विवृतः ?

२. अग्नेर्महत्त्वमधिकृत्य प्रबन्धमेकं रचयत ।

३. नदीसूक्तानि वर्णयत ।

४. ऋग्वेदे छन्दसां वैविध्यं निरूपयत ।

५. वेदान्ततत्त्वं नासदीयसूक्तदिशा विश्वकर्मसूक्तदिशा विवृणुत ।

६. सामवेदस्य महत्त्वं तस्य विभागं च निरूपयत ।

७.ऋग्वेदस्य कालनिर्णये अर्थनिर्णये च पाश्चात्यानां प्रभावः कथमासीत् ?

**II. चतुर्णां लघूत्तराणि लिखत** **4 x 5= 20**

१.अन्नदानस्य महत्त्वं किम् ?

२. सूर्या(विवाह)सूक्तस्य वैशिष्ट्यं वर्णयत ।

३. सामगानपद्धतिमनुसृत्य यथामति लिखत ।

४. सामविकाराः के ? वर्णयत ।

५. यमीयमयोः संवादः कथं वर्णितः ?

६. और्ध्वदैहिकसूक्तानि कानि ?तेषां महत्त्वं च वर्णयत ।

**III. एकेन वक्येन उत्तरं लिखत (पञ्चानामेव)** **5 x 2= 10**

१. ऋग्वेदे कति मण्डलानि ? कति अध्यायाः सन्ति?

२. जैमिनीयशाखा कस्य वेदस्येति लिखत ।

३. सहस्रवर्त्मा को वेदः ?

—अनुवर्तते

४. सामवेदे कति स्वराः सन्ति ?

५. दे॒वो दे॒वभि॒रा॑गमत् । अयं कस्य देवस्य मन्त्रः ।

६.सवितृ, पूषा, मित्रेति मन्त्रवर्णनेन को देवःस्तूयते ?

७. अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः इति कितवसूक्तमन्त्रेण किं ज्ञायते ?

**IV. चतुर्णां लघुटिप्पणीः लिखत** **4x 5=20**

१. इन्द्रः २.अश्विनी ३. सोमः

४.रुद्रः ५. विष्णुः ६. उषा

—०—